Total Pages-02 RNLKWC/M.A./CBCS/IIS/203/24

**SANSKRIT (PG)**
**(CBCS)**
**M.A. 2nd Semester End Examination, 2024**
**(Regular and Supplementary paper)**

PAPER – SAN-203

Full Marks : 40 Time : 2 hours

*The figures in the right-hand margin indicate marks.*
*Canditates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

**[सर्वे प्रश्ना: संस्कृतभाषया देवनागरीलिप्या च समाधेया:।]**

**A. यथाकामं प्रश्नचतुष्टयं समाधत्त।** 2x4=8

1) नैषधचरितस्य मङ्गलश्लोकं लिखत।

2) धर्मस्य कति पादा: सन्ति? कानि च तानि?

3) नलराज्ये अधर्मोऽपि कथं तपस्वितां दधौ?

4) यक्ष: क:? स कुत्र किमर्थं निर्वासित:?

5) यक्षस्य निर्देशानुसारेण मेघेन कुत्र गन्तव्यम्?

6) यक्ष: कथं मेघाय स्वागतं व्याजहार?

**B. यथानिर्देशं समाधत्त।** 4x2=8

**क. यथेच्छं द्वौ उत्तरत।**

i) अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्र: प्रणयन्नुपाधिभि:।
चतुर्दशत्वं कृतवान् कुत: न वक्ति विद्यासु चतुर्दशस्वयम्।।

ii) अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्।।

iii) विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरु:।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुरा: शिर:स्थितम्।।

ख. यथेच्छं द्वौ उत्तरत। 4x2=8

i) कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्त:
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तु:।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।

ii) धूमज्योति: सलिलमरुतां सन्निपात: क्व मेघ:
सन्देशार्था: क्व पटुकरणै: प्राणिभि: प्रापणीया:।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

iii) हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्री:।
चूडापाशे नवकुरुवकं चारुकर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्।।

C. यथानिर्देशमुत्तरत। 8x2=16

क) नैषधचरिते प्रथमसर्गे वर्णितस्य विषयस्य सारम् आलोचयत।

अथवा

नैषधचरितमिति महाकाव्ये नलस्य चरित्रमालोचयत।

ख) मेघदूते मेघस्य यात्रापथं वर्णयत।

अथवा

मेघदूतकाव्ये वर्णिताया: अलकाया: शोभां सश्लोकं वर्णयत।